भृङ्गरजः, पुं, ( भृङ्गान् रञ्जयतीति अन्तर्भूतणयर्थाद् रञ्जोऽच्। पृषोदरादित्वात् न लोपः। ) भृङ्गराजः। इति भावप्रकाशः॥ (यथा,—

"भृङ्गरजत्रिफलोत्पलशारि-
लौहपुरीषसमन्वितकारि॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्राधिकारे॥ )

भृङ्गरजाः, [ स् ] पुं, ( रजयतीति। अन्तर्भूतणयर्थात् रञ्जे "सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८ इति असुन्। ततो "रजेश्च।" ६।४।२६। इति नलोपः। ततो भृङ्गाणां रजाः रञ्जकः। अथवा भृङ्ग इव कृष्णवर्णं रजः परागोऽस्य। ) भृङ्गराजः। इत्यमरटीकायां भरतः॥

भृङ्गराजः, पुं, (भृङ्ग इव राजते इति। भृङ्ग+राज्+अच्। द्रव्यद्वारेण भृङ्गवत् केशकृष्णीकरणात्तथात्वम्। ) क्षुपविशेषः। केसुरिया इति वङ्गभाषा। भेंगरिया इति हिन्दीभाषा। तत्पर्य्यायः। केशराजः २ भृङ्गः ३ पतङ्गः ४ मार्करः ५। इति रत्नमाला॥ भृङ्गाह्वः ६ केशरञ्जनः ७ पितृप्रियः ८ अङ्गारकः ९ केश्यः १० कुन्तलवर्द्धनः ११। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। चक्षुष्यत्वम्। केशरञ्जनत्वम्। कफामशोफश्वित्रनाशित्वम्। तत्र नीलो रसायनः। इति राजनिर्घण्टः॥ अपि च।

"भृङ्गराजो भृङ्गरजः मार्करो भृङ्ग एव च।
भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत्।
केश्यस्त्वच्यः कृमिश्वासकासशोथामयापहृत्॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्तिजित्॥"

इति भावप्रकाशः॥

पक्षिविशेषः। ( यथा, महाभारते।३।१०८।७।
शकुनैश्च विचित्राङ्गैः कूजद्भिर्विविधा गिरः।
भृङ्गराजैस्तथा हंसैर्दात्यूहैर्जलकुक्कुटैः॥" )
भ्रमरः। इति मेदिनी। जे, ३४॥ यन्त्रभेदः। इति धरणिः॥

भृङ्गरिटिः, पुं, (भृङ्ग इव रटति इति। भृङ्ग+रट+इन्। पृषोदरादित्वादिकारागमः। ) शिवद्वारपालः। इति भूरिप्रयोगः॥

भृङ्गरीटिः, पुं, ( भृङ्गरिटि। पृषोदरात् ईत्वम्। ) शिवद्वारपालः। इति भूरिप्रयोगः॥

भृङ्गरोलः, पुं, ( भृङ्ग इव रौति। भृङ्ग+रु+बाहुलकात् ओलच्। अस्य भृङ्गतुल्यशब्दत्वात्तथात्वम्। ) कीटविशेषः। भीमरुल इति भाषा। तत्पर्य्यायः। विषक्का २ वरोलः ३ कृष्णषट्पदः ४। इति त्रिकाण्डशेषः॥

भृङ्गवल्लभः, पुं, ( भृङ्गाणां वल्लभः प्रियः। ) धाराकदम्बः। भूमिकदम्बः। इति राजनिर्घण्टः॥

भृङ्गवल्लभा, स्त्री, (भृङ्गाणां वल्लभा।) भूमिजम्बूः। इति राजनिर्घण्टः॥

भृङ्गसोदरः, पुं, ( भृङ्गाणां सोदरस्तुल्यः। ) केशराजः। इति त्रिकाण्डशेषः॥

भृङ्गानन्दा, स्त्री, ( भृङ्गाणामानन्दो यस्याः पञ्चमी तत्पुरुषः। भृङ्गाणां आनन्दा आनन्दकरी वा। ) यूथिका। इति राजनिर्घण्टः॥

भृङ्गाभीष्टः, पुं, ( भृङ्गाणां अभीष्टः प्रियः। मधुबाहुल्यात्। ) आम्रवृक्षः। इति राजनिर्घण्टः॥ तन्मुकुलफलयोः स्त्री॥

भृङ्गारं, क्ली, (डुभृञ् धारणपोषणयोरिति। भृ+"शृङ्गारभृङ्गारौ।" उणा० ३। १२६। इति आरन् निपातनात् नुम् गुक् च। ) लवङ्गम्। सुवर्णम्। इति राजनिर्घण्टः॥

भृङ्गारः, पुं, ( भृ+आरन् नुम् गुक् च। अथवा "भृङ्गं जलमियर्त्त्यनेनेति।" भृङ्गं+ऋ+करणे घञ्। इत्यमरटीकायां रघुनाथः॥ स्वर्णघटितवारिपात्रम्। ( यथा मार्कण्डेयपुराणे।८२०३।
"नाद्य पश्यामि ते छत्रं भृङ्गारमथवा पुनः॥") तत्पर्य्यायः। कनकालुका २ इत्यमरः॥ गुडुकः ३ गडुकः ४। इति शब्दरत्नावली॥ भृङ्गराजः। इति जटाधरः॥ अथ भृङ्गारोद्देशः।

"राज्ञोऽभिषेकपात्रं यद्भृङ्गार इति तन्मतम्।
तदष्टधा तस्य मानमाकृतिश्चापि चाष्टधा॥
सौवर्णं राजतं भौमं ताम्रं स्फाटिकमेव च।
चान्दनं लौहजं शार्ङ्गमेतदष्टविधं मतम्॥
भानुदिङ्नवसप्ताष्टरुद्रलोकसुरोन्मिताः।
अष्टावष्टौ समाख्याता आयामपरिणाहयोः॥
द्विचतुर्वर्णवेदाब्धिबाणसप्तात्मवृत्तिता।
यथाक्रमं समुद्दिष्टमादित्यादिदशा भुवाम्॥
पद्मरागस्तथा वज्रं वैदूर्य्यमौक्तिकन्तथा।
नीलं मारकतञ्चैव मुक्ता च सप्त कीर्त्तिताः॥
भृङ्गारसप्तके न्यास्या न भौमो मणिमर्हति।
कानकं स्फटिकं वापि सर्व्वेषामुपयुज्यते॥
कानकन्तु क्षितीशानां स्फाटिकं सार्व्वयौगिकम्।
शङ्खपद्मेन्दुकह्लारं प्रत्यस्तं विन्यसेत् क्रमात्॥
चतुर्व्विधानां भूपानां चान्द्रः सर्व्वत्र शस्यते।
श्वेतं रक्तं तथा पीतं कृष्णं चन्दनमुच्यते।
एतेषां सलिलैः सेकश्चतुर्णां स्यान्महीभुजाम्॥
मल्ली पद्मश्च नीलश्च तथा कृष्णापराजिता।
एषां पुष्पाणि केशेषु चतुर्जातिमहीभुजाम्॥
हीरकं पद्मरागश्च वैदूर्य्यं नीलमेव च।
चत्वारो मणयो धेयाश्चतुर्णां सेचनाम्भसि॥
इत्थं निश्चित्य यः कुर्य्यान्नृपतिः सेकमात्मनः।
स चिरायुर्भवेद्भोगी इतोऽन्यस्त्वन्यथाचरन्॥"

इति युक्तिकल्पतरौ भृङ्गारोद्देशः॥

भृङ्गारिः, स्त्री, (भृङ्गं भृङ्गवद्वर्णमृच्छतीति। ऋ+इन्।) केविकापुष्पम्। इति राजनिर्घण्टः॥

भृङ्गारिका, स्त्री, ( भृङ्ग+ऋ+"कर्म्मण्यण्"३। २। १। इति अण्। भृङ्गारः ततः कन्। टाप् अत इत्वञ्च। ) झिल्लिका। यथा,—

"झिल्लीका झिल्लिका वर्षकरी भृङ्गारिका च सा।"

इति हेमचन्द्रः। ४। ८२॥

भृङ्गारी, स्त्री, ( भृङ्गमियर्त्ति रूपेणानुकरोति "कर्म्मण्यण्।"३।२।१। इति अण्। भृङ्गारस्ततः गौरादित्वात् ङीप्। रस्य लत्वे भृङ्गाली च। ) झिल्ली इत्यमरः। २। ५। २८॥

भृङ्गाह्वः, पुं, ( भृङ्गमाह्वयते स्पर्द्धते इति। आ+ह्वे+कः। ) जीवकः। भृङ्गराजः। इति राजनिर्घण्टः॥ ( विवृतिरस्य जीवकभृङ्गराजशब्दयोर्ज्ञातव्या॥

भृङ्गाह्वा, स्त्री, ( भृङ्गमाह्वयते स्पर्द्धते। भृङ्ग+आ+ह्वे+कः स्त्रियां टाप्।) भ्रमरच्छल्ली। इति राजनिर्घण्टः॥

भृङ्गिः, पुं, ( बिभर्त्तीति। भृ+बाहुलकात् गिक् नुट् च। ) भृङ्गी। यथा,—

"प्राप्ता गणाधिपत्यं त्वं नाम्ना भृङ्गिरिति स्मृतः।"

इति वामनपुराणे ४५ अध्यायः॥

भृङ्गिणी, स्त्री, ( भृङ्गवत् वर्णो अस्या अस्तीति इनिः। ङीप्। ) वटवृक्षः। इति राजनिर्घण्टः॥

भृङ्गी, स्त्री, ( भृ+गक्+नुट्+गौरादित्वात् ङीष्। ) अतिविषा। इति राजनिर्घण्टः॥

भृङ्गी, [ न् ] पुं, ( भृङ्गः भृङ्गवद्वर्णोऽस्यास्तीति। इनिः।) वटवृक्षः। इति राजनिर्घण्टः॥ शिवद्वारपालविशेषः। तत्पर्य्यायः। भृङ्गिरिटिः २ भृङ्गरीटः ३ शृङ्गः ४ नाड़ीदेहः ५ अस्थिविग्रहः ६। इति त्रिकाण्डशेषः॥ भृङ्गिरिटिः ७। इति भूरिप्रयोगः॥ तस्य जन्मकारणं यथा,—

ईश्वर उवाच।

"रतिमात्रेण नोमायां मत्पुत्त्रः संभविष्यति।
महामैथुनसंत्यागात् स्यादपुत्त्री च पार्व्वती॥
तस्मादहन्तु देवानां वचनाद्ब्रह्मणस्तथा।
त्यक्ष्ये महामैथुनन्तु किन्त्वेकं कुरुतामराः!॥
येन मे सुमहत्तेजो महामैथुनकारणम्।
धार्य्यं तेजस्विनं देवमानयन्त्वमरास्तु तम्॥
यो निष्कम्पो निर्व्विकारो भूत्वा तेजो ग्रहीष्यति।
तस्मै वदन्तु त्रिदशास्त्यक्ष्ये तेषः शरीरजम्॥"

श्रीऔर्व्व उवाच।

"हरध्वजवचः श्रुत्वा देवा ब्रह्मपुरोगमाः।
हरतेजोग्रहायाथ वीतिहोत्रं यशुर्द्धिया॥
अथ ब्रह्मा समामन्त्र्य तथाहुत्वाप्य पावकम्।
सेन्द्रा देवगणाः सर्व्वे हरमूचुरिदं वचः॥"

श्रीदेवा ऊचुः।

"एष वैश्वानरः श्रीमान् भूरितेजोमयो बली।
महामैथुनबीजन्तु त्वत्तेजः संग्रहीष्यति॥
इत्युक्त्वा त्रिदशाः सर्व्वे वीतिहोत्रं पुरःस्थितम्।
तस्मै निदेशयामासुः शम्भवे सर्व्वहेतवे॥
ततः षड्ङ्गं स्वं रेतो थादिते दहनानने।
उत्ससर्ज महाबाहुर्महामैथुनकारणम्॥
अमावुत्स्च्यमानस्य तेजसः शशभृद्भृतः।
अणुद्वयमतिस्वल्पं गिरिप्रस्थे पपात ह॥
तयोः कारणयोः सद्यः सम्भूतौ शङ्करात्मजौ।
एको भृङ्गसमः कृष्णो भिन्नाञ्जननिभोऽपरः॥
भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गीति चाकरोत्।